## || कनक धारास्तोत्र ||

अङ्गं हरेः पुलकभूषणमाश्रयन्ती भृङ्गाङ्गनेव मुकुलाभरणं तमालम्।
अङ्गीकृताखिलविभूतिरपाङ्गलीला माङ्गल्यदास्तुमम मङ्गळदेवतायाः ।। १।।

मुग्धा मुहुर्विदधती वदनेमुरारेः प्रेमत्रपाप्रणिहितानि गतागतानि ।
माला दृशोर्मधुकरीव महोत्पलेया सा मेश्रियं दिशतुसागरसंभवायाः ।। २।।

आमीलिताक्षमधिगम्य मुदा मुकुन्दं आनन्दकन्दमनिमेषमनङ्गतन्त्रम्।
आकेकरस्थितकनीनिकपक्ष्मनेत्रं भूत्यैभवेन्मम भुजङ्गशयाङ्गनायाः ।। ३।।

बाह्वन्तरेमधुजितः श्रितकौस्तुभेया हारावलीव हरिनीलमयी विभाति ।
कामप्रदा भगवतोऽपि कटाक्षमाला कल्याणमावहतुमेकमलालयायाः ।। ४।।

कालाम्बुदाळिललितोरसि कैटभारेः धाराधरेस्फुरति या तडिदङ्गनेव ।
मातुस्समस्तजगतां महनीयमूर्तिः भद्राणि मेदिशतुभार्गवनन्दनायाः ।। ५।।

प्राप्तं पदं प्रथमतः खलुयत्प्रभावात् माङ्गल्यभाजि मधुमाथिनि मन्मथेन ।
मय्यापतेत्तदिह मन्थरमीक्षणार्धं मन्दालसं च मकरालयकन्यकायाः ।। ६।।

विश्वामरेन्द्रपदवीभ्रमदानदक्षं आनन्दहेतुरधिकं मुरविद्विषोऽपि ।
ईषन्निषीदतुमयि क्षणमीक्षणार्द्धम् इन्दीवरोदरसहोदरमिन्दिरायाः ।। ७।।

इष्टा विशिष्टमतयोऽपि यया दयार्द्र दृष्ट्या त्रिविष्टपपदं सुलभं लभन्ते।

दृष्टिः प्रहृष्टकमलोदरदीप्तिरिष्टां पुष्टिं कृषीष्ट मम पुष्करविष्टरायाः ।। ८।।

दद्याद्दयानुपवनो द्रविणाम्बुधारां अस्मिन्नकिञ्चनविहङ्गशिशौ विषण्णे।
दुष्कर्मघर्ममपनीय चिराय दूरं नारायणप्रणयिनीनयनाम्बुवाहः ।। ९।।

गीर्देवतेति गरुडध्वजसुन्दरीति शाकम्भरीति शशिशेखरवल्लभेति ।
सृष्टिस्थितिप्रलयकेलिषुसंस्थिता या तस्यैनमस्त्रिभुवनैकगुरोस्तरुण्यै।। १०।।

श्रुत्यैनमोऽस्तुशुभकर्मफलप्रसूत्यै रत्यैनमोऽस्तुरमणीयगुणार्णवायै।
शक्त्यैनमोऽस्तुशतपत्रनिकेतनायै पुष्ट्यैनमोऽस्तुपुरुषोत्तमवल्लभायै।। ११।।

नमोऽस्तुनालीकनिभाननायै नमोऽस्तुदुग्धोदधिजन्मभूम्यै ।
नमोऽस्तुसोमामृतसोदरायै नमोऽस्तुनारायणवल्लभायै।। १२।।

नमोऽस्तुहेमाम्बुजपीठिकायै नमोऽस्तुभूमण्डलनायिकायै।
नमोऽस्तुदेवादिदयापरायै नमोऽस्तुशार्ङ्गायुधवल्लभायै ।। १३।।

नमोऽस्तुदेव्यै भृगुनन्दनायै नमोऽस्तुविष्णोरुरसि स्थितायै।
नमोऽस्तुलक्ष्म्यैकमलालयायै नमोऽस्तुदामोदरवल्लभायै।। १४।।

नमोऽस्तुकान्त्यैकमलेक्षणायै नमोऽस्तुभूत्यैभुवनप्रसूत्यै।
नमोऽस्तु देवादिभिरर्चितायै नमोऽस्तुनन्दात्मजवल्लभायै ।। १५।।

सम्पत्कराणि सकलेन्द्रियनन्दनानि साम्राज्यदानविभवानि सरोरुहाक्षि ।
त्वद्वन्दनानि दुरिताहरणोद्यतानि मामेव मातरनिशं कलयन्तुमान्ये ।। १६।।

यत्कटाक्षसमुपासनाविधिः सेवकस्य सकलार्थसम्पदः ।
संतनोति वचनाङ्गमानसैः त्वां मुरारिहृदयेश्वरीं भजे ।। १७।।

सरसिजनिलयेसरोजहस्ते धवळतमांशुकगन्धमाल्यशोभे।
भगवति हरिवल्लभेमनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ।। १८।।

दिग्घस्तिभिः कनककुंभमुखावसृष्ट स्वर्वाहिनी विमलचारुजलाप्लुताङ्गीम् ।
प्रातर्नमामि जगतां जननीमशेष लोकाधिनाथगृहिणीममृताब्धिपुत्रीम् ।। १९।।

कमलेकमलाक्षवल्लभेत्वं करुणापूरतरङ्गितैरपाङ्गैः ।
अवलोकय मामकिञ्चनानां प्रथमं पात्रमकृत्रिमं दयायाः ।। २०।।

देवि प्रसीद जगदीश्वरि लोकमातः कल्यानगात्रि कमलेक्षणजीवनाथे।
दारिद्र्यभीतिहृदयं शरणागतं माम् आलोकय प्रतिदिनं सदयैरपाङ्गैः ।। २१।।

स्तुवन्ति येस्तुतिभिरमीभिरन्वहं त्रयीमयीं त्रिभुवनमातरं रमाम्।
गुणाधिका गुरुतरभाग्यभागिनो भवन्ति तेभुवि बुधभाविताशयाः ।। २२।।

।। इति श्रीमद् शङ्कराचार्यकृत श्री कनकधारास्तोत्रं सम्पूर्णम्।।

www.mypanditg.com